24E/23E NEP

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत विशारद (बी.ए.) – नियमित

### परीक्षा : मे – २०२५

### सत्र २ रे/सत्र १ ले

**विषयः प्रतिमा (24E421/23E411)**

| | | |
|---|---|---|
| **दिनांक : १३/०५/२०२५** | **गुण :१००** | **वेळ : स. १०.०० ते १.००** |

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र १. चतुर्णां माध्यमभाषया अनुवादं कुरुत।** (२०)

१. आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते स्कन्धोच्चारणनम्यमानवदनप्रच्योतितोये घटे।
राज्ञाहूय विसर्जिते मयि जनो धैर्येण मे विस्मितः स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भो विस्मयः॥
२. तं स्मृत्वा शुल्कदोषं भवतु मम सुतो राजेत्यभिहितं तद्वैर्येणाश्वसत्या व्रज सुत वनमित्यार्योऽप्यभिहितः।
तं दृष्ट्वा बद्धचीरं निधनमसदृशं राजा ननु गतः पात्यन्ते धिक्प्रलापा ननु मयि सदृशाः शेषाः प्रकृतिभिः ॥
३.वक्षः प्रसारय कवाटपुटप्रमाणमालिङ्ग मां सुविपुलेन भुजद्वयेन।
उन्नामयाननमिदं शरदिन्दुकल्पं प्रह्लादय व्यसनदग्धमिदं शरीरम्॥
४.प्रख्यातसद्गुणगणः प्रतिपक्षकालस्तिग्मांशुवंशतिलकस्त्रिदशेन्द्रकल्पः।
आज्ञावशादखिलभूपरिरक्षणस्थः श्रीमानुदारकलभेभसमानयानः॥
५.गत्वा तु पूर्वमयमार्यनिरीक्षणार्थं लब्धप्रसादशपथे मयि सन्निवृत्ते।
दृष्ट्वा किमागत इहात्रभवान् सुमन्त्रो रामं प्रजानयनबुद्धिमनोभिरामम्॥
६.हा वत्स राम जगतां नयनाभिराम हा वत्स लक्ष्मण सलक्षणसर्वगात्र।
हा साध्वि मैथिलि पतिस्थितचित्तवृत्ते हा हा गताः किल वनं बत मे तनूजाः॥

**प्र.२ प्रथमाङ्कस्य तृतीयाङ्कस्य वा रसग्रहणं कुरुत।** (२०)

**प्र.३ वाक्यत्रयं ससन्दर्भं स्पष्टीकुरुत।** (३६)

१. क्रौञ्चत्वं वा गमिष्यति।

२. जीमूतचन्द्र इव खे प्रभया वियुक्तः।

३. त्वया किं न कृतं त्रयम्।

४. का नाम माता पुत्रकस्यापराधं न मर्षयति।

**प्र.४ द्वौ समाधेयौ।** (२४)

१. 'भासो हासः' इति वचनं स्पष्टीकुरुत।

२. प्रतिमानाटके व्यक्तीनां कृतम् उदात्तीकरणं सोदाहरणं विशदीकुरुत।

३. द्वयोः व्यक्तिचित्रणं कुरुत- रामः, कैकेयी, रावणः

४. टिप्पण्यौ लिखत- रूपकम्, प्रवेशकः, नान्दी

----------